# आदर्श-प्रश्नपत्रम्

**कक्षा – द्वादशी (12th)** **पूर्णाङ्काः – 80**

**विषयः – संस्कृतम्** **समयः – घण्टात्रयम्**

**अवधेयम् – प्रश्नों के उत्तर यथा निर्देश हिन्दी अथवा संस्कृत भाषा में दें।**

## भाग – क (अपठित-अवबोधः)

प्रश्नः 1. रामायणं मम प्रिय-पुस्तकम् अस्ति। रामायणम् आदिकाव्यम् अपि कथ्यते। रामायणस्य रचयिता महर्षिः वाल्मीकिः अस्ति। अत्र रामस्य चरित्रं वर्णितम् अस्ति। श्रीरामः पितुः आज्ञापालनाय वनं गतवान्। श्रीरामः राक्षसाणां वधम् अपि अकरोत्।

उपर्युक्तं गद्यांशं पठित्वा निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत - 4×2 =8

क. रामायणस्य रचयिता कः ?

ख. रामायणे किं वर्णितम् अस्ति ?

ग. रामः केषां वधम् अकरोत् ?

घ. गद्यांशस्य कृते समुचितं शीर्षकं लिखत।

## भाग – ख (रचनात्मक - कार्यम्)

प्रश्नः 2. चतुर्णां वाक्यानां संस्कृतेन अनुवादं कुरुत - 4

क. बालक जाता है।

ख. वे सब जानते हैं।

ग. हम सभी खाते हैं।

घ. तुम सभी देखते हो।

ङ. अध्यापक छात्रों को पढाकर लिखता है।

च. जल निर्मल है।

प्रश्नः 3. निम्न-लिखित- पङ्क्तीनां हिन्दी - भाषायाम् अनुवादं कुरुत – 4

महाकविः कालिदासः संस्कृतसाहित्ये सर्वश्रेष्ठः कविः अस्ति। अस्य "अभिज्ञानशाकुन्तलम्" नाटकं विश्वे प्रसिद्धम् अस्ति। अस्मिन् नाटके सप्त अङ्काः सन्ति। अस्मिन् नाटके नायकः दुष्यन्तः नायिका शकुन्तला च अस्ति।

प्रश्नः 4. रामायणस्य महत्त्वं लिखत। 4

अथवा

महाभारतस्य महत्त्वं प्रकाशयत।

## भाग – ग (अनुप्रयुक्त - व्याकरणम्)

प्रश्नः 8

प्रश्नः 5. निम्नलिखितानां प्रश्नानाम् उत्तरं निर्देशानुसारं लिखत -

क. निम्नलिखितेषु द्वयोः सन्धिं कुरुत – 2

1.नमः + कारः। 2.मनः+हरः । 3.तिरः + कारः ।

ख. निम्नलिखितेषु द्वयोः सन्धि-विच्छेदं कुरुत – 2

1.चिदानन्दः । 2.जगन्नाथः। 3. रामस्तिष्ठति ।

ग. राजन् अथवा आत्मन् शब्दस्य रूपाणि लिखत । 2

घ. तद् अथवा किम् शब्दस्य रूपाणि लिखत। (केवलं पुल्लिंगे) 2

ङ. "दा" धातुः लट्-लकारे अथवा "ज्ञा" धातुः लृट्-लकारे लिखत। 2

च. "खाद्" धातुः लोट्-लकारे अथवा "लिख्" धातुः विधिलिङ्ग-लकारे लिखत 2

छ. चतुर्णां कृदन्तरूपाणि लिखत। 4

चल् + शतृ, कृ + अनीयर्, दा + यत्, ज्ञा + तव्यत्, चल् + शानच्।

ज. निम्नलिखितेषु शब्देषु कः समासः ? चतुर्णां नामानि लिखत – 4

गजाननः, यथाशक्ति, उपकृष्णम्, सुमद्रम्, पीताम्बरः।

**भाग – घ ( पठित- अवबोधः )**

प्रश्नः 6. द्वयोः श्लोकयोः सप्रसङ्ग- व्याख्यां कुरुत - 4×2 =8

क. आरब्धे पटहे स्थिते गुरुजने भद्रासने लङ्घिते
स्कन्धोच्चारणनम्यमानवदनप्रच्योतितोये घटे।
राज्ञाहूय विर्सजिते मयि जनो धैर्येण मे विस्मितः
स्वः पुत्रः कुरुते पितुर्यदि वचः कस्तत्र भो ! विस्मयः ?

ख. अनुचरति शशाङ्कं राहुदोषेऽपि तारा
पतति च वनवृक्षे याति भूमि लता च।
त्यजति न च करेणुः पङ्कलग्नं गजेन्द्रं
व्रजतु चरतु धर्मं भर्तृनाथा हि नार्यः ॥

ग. यदि न सहसे राज्ञो मोहं धनुः स्पृश मा दया
स्वजननिभृतः सर्वोऽप्येवं मृदुः परिभूयते।
अथ न रुचितं मुञ्च त्वं मामहं कृतनिश्चयो
युवतिरहितं लोकं कर्तुं यतश्छलिता वयम् ॥ १८ ॥

घ. वनगमननिवृत्तिः पार्थिवस्यैव ताव-
न्मम पितृपरवत्ता बालभावः स एव।
नवनृपतिविमर्शे नास्ति शङ्का प्रजाना-
मथ च न परिभोगैर्वञ्चिता भ्रातरो मे ॥

प्रश्नः 7. प्रतिमानाटकस्य प्रथम-अङ्कस्य सारः स्वशब्दैः लिखत। 4

अथवा

रामस्य चरित्रचित्रणं स्वशब्दैः कुरुत।

प्रश्नः 8. एकस्य श्लोकस्य अनुवादं कुरुत – 3

क. रामेणापि परित्यक्तो लक्ष्मणेन च गर्हितः ।
अयशोभाजनं लोके परित्यक्तस्त्वयाप्यहम् ॥

ख. शून्यः प्राप्तो यदि रथो भग्नो मम मनोरथः ।
नूनं दशरथं नेतुं कालेन प्रेषितो रथः ॥

प्रश्नः 9. त्रयाणां प्रश्नानाम् उत्तराणि लिखत। 3

क. प्रतिमानाटकस्य लेखकः कः ?

ख. प्रतिमानाटके कति अङ्काः सन्ति ?

ग. प्रतिमानाटकस्य नायकः कः ?

घ. प्रतिमानाटके कस्य कथा वर्णिता अस्ति ?

प्रश्नः 10. एकस्य श्लोकस्य व्याख्यां कुरुत। 5

क. तस्मिन्नद्रौ कतिचिदबलाविप्रयुक्तः स कामी
नीत्वा मासान्कनकवलयभ्रंशरिक्तप्रकोष्ठः ।
आषाढस्य प्रथमदिवसे मेघमाश्लिष्टसानुं
वप्रक्रीडापरिणतगजप्रेक्षणीयं ददर्श ॥

ख. धूमज्योतिः सलिलमरुतां सन्निपातः क्व मेघः
सन्देशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः ।
इत्यौत्सुक्यादपरिगणयन्गुह्यकस्तं ययाचे
कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु ॥

प्रश्नः 11. एकस्य श्लोकस्य अनुवादं कुरुत – 4

क. त्वामासारप्रशमितवनोपप्लवं साधु मूर्ध्ना
वक्ष्यत्यध्वश्रमपरिगतं सानुमानाम्रकूटः ।
न क्षुद्रोऽपि प्रथमसुकृतापेक्षया संश्रयाया
प्राप्ते मित्रे भवति विमुखः किं पुनर्यस्तथोच्चैः ॥

ख. नीतं दृष्ट्वा हरितकपिशं केसरैरर्धरूढै-
राविर्भूतप्रथममुकुलाः कन्दलीश्चानुकच्छन् ।
जग्ध्वाऽरण्येष्वधिकसुरभिं गन्धमाघ्राय चोर्व्याः
सारङ्गास्ते जललवमुचः सूचयिष्यन्ति मार्गम् ॥

प्रश्नः 12. त्रयाणां प्रश्नानाम् उत्तराणि लिखत। 3

क. मेघदूतस्य कर्ता कः ?

ख. मेघान् कः अपश्यत् ?

ग. मेघदूते किं छन्दः ?

घ. मेघदूतस्य कति भागाः ?

**भाग – ङ (साहित्यम्)**

प्रश्नः 13. संस्कृत-साहित्यस्य महत्त्वं प्रतिपादयत। 4

अथवा

संस्कृत-साहित्यस्य उत्पतिः विकासश्च इति विषये लघु टिप्पणीं लिखत।

14. नाटककारस्य अश्वघोषस्य सङ्क्षिप्तं जीवनपरिचयं लिखत। 3

15.गद्यकारस्य दण्डिनः सङ्क्षिप्तं परिचयं लिखित्वा तस्य एकस्याः रचनायाः नाम लिखत ? 3